**2.6.1 संस्थान ने सीखने के परिणाम (सामान्य और कार्यक्रम विशिष्ट)/स्नातक विशेषताओं को बताया है जिन्हें मूल्यांकन प्रक्रिया में एकीकृत किया गया है और वेबसाइट और अन्य दस्तावेजों के माध्यम से व्यापक रूप से प्रचारित किया गया है।**

***The institution has stated learning outcomes (generic and programme specific)/ graduate attributes which are integrated into the assessment process and widely publicized through the website and other documents***

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयद्वारा परिचालितानां सर्वेषां पाठ्यक्रमाणां परिणामाः उद्घोष्यन्ते। पाठ्यक्रमाणां विशिष्टपरिणामाः जालस्थाने प्रदर्श्यन्ते। सम्बन्धिन्यः सूचनाः सम्बन्धिभिः साक्षात् तत्तत्स्थाने प्राप्तुं शक्यन्ते। जालस्थाने परिणामानां प्रकाशनस्य निर्दिष्टां काचित् प्रक्रिया वर्तते। विश्वविद्यालयद्वारा प्राप्तोपाधयः तया प्रक्रियया सन्तुष्टाश्च सन्ति।

विश्वविद्यालयेन शास्त्री, आचार्यः, शिक्षाशास्त्री, विद्यावारिधिः इति पाठ्यक्रमाः संचाल्यन्ते। विश्वविद्यालयस्य सर्वोऽपि पाठ्यक्रमः चतुर्मुखी वर्तते। विषयः समयः पुष्टिः, इति चतुरः बिन्दून परिगणîय पाठ्यक्रमाणां विन्यासः क्रियते। पाठ्यक्रमे अंगीकरणीयाः विषयाः शास्त्रीयाः आधुनिकाश्च भारतीयमौल्यप्रतिपादकाः भवेयुः। किåच ते साम्प्रतिकाः भवेयुः। सर्वेऽपि पाठ्यक्रमाः निर्धारितसमयेन सामंजस्य भजेरन्। पाठ्यक्रमाः अध्येतुः समाजस्य च अपेक्षाणां पूरणे तुष्टिप्रदा भवेयुः। सर्वे पाठ्यक्रमाः अध्येतुः तोषजनकाः स्युः। तुष्टिश्च पाठ्यक्रमाणाम् आकर्षकेण विन्यासेन सिद्धयति। एवं चतुर्मुखी पाठ्यक्रमः विश्वविद्यालयेन निर्धार्यते।

विश्वविद्यालयस्य अध्ययनपरिषत् पाठ्यक्रमाणां निर्धारणं करोति। विश्वविद्यालयस्य माननीयेन कुलपतिना सह विमृश्य परिषदियं तान् पाठ्यक्रमान् निर्धारयति। परिषदि विश्वविद्यालयस्य अन्यविश्वविद्यायानाåच आचार्याः सदस्यत्वेन भवन्ति। शैक्षिकविभागः कार्यपरिषदः पुरस्तात् प्रस्तावं करोति। एवं विविधस्तरेषु अनुशीलनं–अनुमोदनपुरस्सरं निर्धारिताः पाठ्यक्रमाः विश्वविद्यालयस्य जालपुटे प्राकश्यन्ते। प्रतिवर्षत्रयं पाठ्यक्रमस्य परिवर्तनं विधीयते।

विश्वविद्यालयस्य शैक्षिकविभागः पाठ्यक्रमाणां परिणामान् विशिष्टपरिणामांश्च परिशीलयति। समये समये स्वीक्रियमणया योजनया परिणामेषु गुणाः लक्ष्यन्ते। ततः अन्यासां शैक्षिकयोजनानां क्रियान्वयने उत्साहः वर्धते।

विश्वविद्यालयस्य ध्येयोद्देष्यानुगणं पाठ्यक्रमाः निर्धार्यन्ते। नानाक्षेत्रेषु उद्योगप्राप्तये एते पाठ्यक्रमाः सहकारिणः भवन्ति। शास्त्रिपाठ्यक्रमस्य अर्हताधोरण विविधाः उद्योगावसराः लभ्यन्ते। वित्तकोषः भारतीयरेल्वे, राज्यनागरिकसेवा, केन्द्रनागरिकसेवा, भारतीयपोस्ट–विभागः इत्यादीनां प्रवेशपरीक्षं लेखितुम् अर्हता प्राप्यते। अन्यविश्वविद्यालयानां पदवीधरैः सह सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य पदवीधराः समानावसरं लभमानाः सन्ति। बहवः उक्तेषु औद्योगिकक्षेत्रेषु वृत्तिम् अलभन्त। आयुर्वेदसाहित्यस्य वास्तुज्योतिषस्य, योगविज्ञानस्य च पदविकापाठ्यक्रमाः कौशलाधारिता वर्तन्ते। तेन प्राप्तपदवीकानां स्वतन्त्रतया उद्योगं कर्तुं दक्षता विश्वासश्च सिद्धयति। असौ विश्वविद्यालयस्य पाठ्यक्रमाणां साक्षात् परिणम् वर्तते।

विश्वविद्यालयस्य पाठ्यक्रमेषु प्राचीनविद्यया सह आधुनिकविद्याया अपि समन्वयः वर्तते। संस्कृतपदवीधराः आंग्लभाषायामपि निपुणाः सन्तः विदेशेषु संस्कृतप्रचारकार्यं कर्तुम् उत्सहन्ते। एवं ते भारतस्य सांस्कृतिकप्रतिनिधित्वेन आत्मानं व्यापारयितुं संकल्पन्ते।

विश्वविद्यालयस्य पारदर्शिनी नीतिः छात्रप्रिया शास्त्रप्रिया च वर्तते। शैक्षिककार्याणां सर्वाः सूचनाः विश्वविद्यालयस्य भित्तौ प्रकाश्यन्ते। ताः सूचनाः अध्यापकैः अभिभावकैश्च सुलभतया अनुसर्तुम् एष उपक्रम सौविध्यं कल्पयति। एवं पाठ्यक्रमाणां परिणामाः हस्तामलकीक्रियन्ते।

विद्यावारिधिपाठ्यक्रमे ईमैल् द्वारा, दूरवाणीमाध्यमेन च अनुसन्धातुः कृते मौखिकपरीक्षायाः सूचना दीयते। मौखिकपरीक्षायाम् उत्तीर्णानां नामानि विश्वविद्यालयस्य सम्बन्धिपरिसस्य च अन्तर्जाले प्रकाष्यन्ते।